श्री मधुराष्टकम्

Shri Madhurashtakam

Source: Internet Archive — Pushtimargiya Stotra Ratnakara, ed. Harishankar Shastri, Benares 1928 (Jangamwadi Math Collection scan, CC0; Madhurashtakam on printed pages 55–57). Also compared: Creative Commons CC0 1.0 — scan release; Sanskrit Wikisource — Madhurashtakam, fixed comparison revision 322041.

VERSE 1

अधरं मधुरं वदनं मधुरं
नयनं मधुरं हसितं मधुरम्।
हृदयं मधुरं गमनं मधुरं
मधुराधिपतेरखिलं मधुरम्॥१॥

Adharaṃ Madhuraṃ Vadanaṃ Madhuraṃ
Nayanaṃ Madhuraṃ Hasitaṃ Madhuram |
Hṛdayaṃ Madhuraṃ Gamanaṃ Madhuraṃ
Madhurādhipaterakhilaṃ Madhuram ||1||

VERSE 2

वचनं मधुरं चरितं मधुरं
वसनं मधुरं वलितं मधुरम्।
चलितं मधुरं भ्रमितं मधुरं
मधुराधिपतेरखिलं मधुरम्॥२॥

Vacanaṃ Madhuraṃ Caritaṃ Madhuraṃ
Vasanaṃ Madhuraṃ Valitaṃ Madhuram |
Calitaṃ Madhuraṃ Bhramitaṃ Madhuraṃ
Madhurādhipaterakhilaṃ Madhuram ||2||

VERSE 3

वेणुर्मधुरो रेणुर्मधुरः
पाणिर्मधुरः पादौ मधुरौ।
नृत्यं मधुरं सख्यं मधुरं
मधुराधिपतेरखिलं मधुरम्॥३॥

Veṇurmadhuro Reṇurmadhuraḥ
Pāṇirmadhuraḥ Pādau Madhurau |
Nṛtyaṃ Madhuraṃ Sakhyaṃ Madhuraṃ
Madhurādhipaterakhilaṃ Madhuram ||3||

VERSE 4

गीतं मधुरं पीतं मधुरं
भक्तं मधुरं सुप्तं मधुरम्।
रूपं मधुरं तिलकं मधुरं
मधुराधिपतेरखिलं मधुरम्॥४॥

Gītaṃ Madhuraṃ Pītaṃ Madhuraṃ
Bhaktaṃ Madhuraṃ Suptaṃ Madhuram |
Rūpaṃ Madhuraṃ Tilakaṃ Madhuraṃ
Madhurādhipaterakhilaṃ Madhuram ||4||

VERSE 5

करणं मधुरं तरणं मधुरं
हरणं मधुरं रमणं मधुरम्।
वमितं मधुरं शमितं मधुरं
मधुराधिपतेरखिलं मधुरम्॥५॥

Karaṇaṃ Madhuraṃ Taraṇaṃ Madhuraṃ
Haraṇaṃ Madhuraṃ Ramaṇaṃ Madhuram |
Vamitaṃ Madhuraṃ Śamitaṃ Madhuraṃ
Madhurādhipaterakhilaṃ Madhuram ||5||

VERSE 6

गुञ्जा मधुरा माला मधुरा
यमुना मधुरा वीचिर्मधुरा।
सलिलं मधुरं कमलं मधुरं
मधुराधिपतेरखिलं मधुरम्॥६॥

Guñjā Madhurā Mālā Madhurā
Yamunā Madhurā Vīcirmadhurā |
Salilaṃ Madhuraṃ Kamalaṃ Madhuraṃ
Madhurādhipaterakhilaṃ Madhuram ||6||

VERSE 7

गोपी मधुरा लीला मधुरा
युक्तं मधुरं भुक्तं मधुरम्।
इष्टं मधुरं शिष्टं मधुरं
मधुराधिपतेरखिलं मधुरम्॥७॥

Gopī Madhurā Līlā Madhurā
Yuktaṃ Madhuraṃ Bhuktaṃ Madhuram |
Iṣṭaṃ Madhuraṃ Śiṣṭaṃ Madhuraṃ
Madhurādhipaterakhilaṃ Madhuram ||7||

VERSE 8

गोपा मधुरा गावो मधुरा
यष्टिर्मधुरा सृष्टिर्मधुरा।
दलितं मधुरं फलितं मधुरं
मधुराधिपतेरखिलं मधुरम्॥८॥

Gopā Madhurā Gāvo Madhurā
Yaṣṭirmadhurā Sṛṣṭirmadhurā |
Dalitaṃ Madhuraṃ Phalitaṃ Madhuraṃ
Madhurādhipaterakhilaṃ Madhuram ||8||

MADHURASHTAKAM COLOPHON — NOT A NUMBERED VERSE

इति श्रीवल्लभाचार्यविरचितं मधुराष्टकं समाप्तम्॥

Iti Śrīvallabhācāryaviracitaṃ Madhurāṣṭakaṃ Samāptam ||